# झारखण्ड (JAC) 2014 (A) बोर्ड परीक्षा में पूछे गये प्रश्न एवं उनके आदर्श उत्तर

Time : 3 Hours ] निर्देश के लिए देखें 2015(A) प्रश्नोत्तर [ Full Marks : 100

## खण्ड-क : अपठितम्-अवबोधनम् ( 15 अंका: )

**1. अधोलिखित अनुच्छेदद्वयं पठित्वा तदाधारितान् प्रश्नान् यथानिर्देशम् उत्तरत–**

### ( अ ) प्रथमः अनुच्छेदः

नगरं गच्छन् एक: पथिक: मार्गे एकम् आम्रवृक्षम् अपश्यत्। वृक्षे बहूनि आम्राणि लग्नानि आसन्। यदा स: कञ्चित् कालं तत्र अतिष्ठत् वृक्षात् मधुराणि आम्राणि अपतन्। स: वृक्षस्य छायायां उपविश्य मधुराणि आम्राणि अखादत्। पथिक: किञ्चित् क्षणं विश्रामम् अपि अकरोत्। वृक्षे बहव: खगा: अपि आसन्। ते तत्र कलरवे संलग्ना: आसन्। एतान् सर्वान् दृष्ट्वा पथिक: अचिन्तयत्-यत् एते वृक्षा: धन्या: सन्ति ये स्व सर्वस्वेन जीवान् उपकुर्वन्ति।

**(i) एकपदेन उत्तरत–** $2 \times \frac{1}{2} = 1$

(क) कः वृक्षस्य छायायां विश्रामं अकरोत्?

(ख) वृक्षे के आसन्?

**(ii) पूर्णवाक्येन उत्तरत–** $2 \times 1 = 2$

(क) वृक्षाः कथं धन्याः सन्ति?

(ख) मधुराणि आम्राणि कुतः अपतन्?

**(iii) निर्देशानुसारम् उत्तरत–** $4 \times \frac{1}{2} = 2$

(क) 'अखादत्' इति क्रियायाः कर्तृपदं किम्?

(ख) 'आसन्' इति क्रियायां कः लकारः?

(ग) 'गच्छन्' इति पदस्य प्रकृति-प्रत्ययौ लिखत।

(घ) गद्यांशस्य अन्तिमे वाक्ये 'ये' इति सर्वनामपदं कस्मै प्रयुक्तम्?

### ( आ ) द्वितीय: अनुच्छेद:

विद्याध्ययनं परिसमाप्य गुरुदक्षिणां दातुम् उत्सुक: असौ कौत्स: एकदा गुरुम् उपगम्य निजेच्छां प्रकटितवान्। तस्य वच: श्रुत्वा गुरुणा कथिम्–"तव विशुद्धया श्रद्धया, उत्कृष्टया भावनया, परमया सेवया च नितान्तमस्मि प्रीत:। तस्मात् नाहं कामये अन्यां काञ्चित् दक्षिणाम्। आचार्यस्य वाक्यं श्रुत्वा कौत्स: पुन: अवदत्–"यदि न ग्रहीष्यन्ति भवन्त: मम सकाशात् किमपि, तदा ममाध्ययनं व्यर्थम् एवेति मे विश्वास:।" एवं रीत्या यदा कौत्स: वारं वारम् आग्रहं कृतवान् कुपित: भूत्वा तदा गुरुणा कथितम्–"त्वं मम सकाशात् चतुर्दश विद्या: विद्या: अधीतवान् असि, अत: चतुर्दश कोटी: स्वर्णमुद्रा: मह्यं देहि" इति। गुरो: वचनं श्रुत्वा कौत्सस्य मनसि महती चिन्ता जाता, एतावत्य: मह्यं कुत: आनेतव्या:?

इति । न च दृश्यते कश्चन् अन्यो जनः एतावत् धनं दातुं समर्थः । तस्मात् दातॄणां मध्ये श्रेष्ठस्य रघोः सकाशं चलितव्यम् इति विचार्य कौत्सः रघोः समीपं गतवान् ।

(i) एकपदेन उत्तरत– $4 \times \frac{1}{2} = 2$

(क) किं परिसमाप्य कौत्सः, गुरुम् उपागच्छत् ?

(ख) कौत्सस्य श्रद्धा कीदृशी आसीत् ?

(ii) पूर्णवाक्येन उत्तरत– $2 \times 2 = 4$

(क) कौत्सस्य वचनं श्रुत्वा गुरुणां किं कथितम् ?

(ख) गुरोः वचनं श्रुत्वा कौत्सस्य मनसि का चिन्ता जाता ?

(iii) निर्देशानुसारम् उत्तरत– $4 \times \frac{1}{2} = 2$

(क) 'कथितम्' इति क्रियापदस्य किं कर्तृपदम् ?

(ख) 'समीपस्य' अर्थे गद्यांशे कः शब्दः अत्र प्रयुक्तः ?

(ग) 'नाहम्' शब्दस्य संधि-विच्छेदं कृत्वा लिखत।

(घ) 'आग्रहम्' इति पदे उपसर्गं पृथक् कुरुत।

(iv) अस्य गद्यांशस्य उपयुक्तं शीर्षकं लिखत– 2

## खण्ड-ख : रचनात्मकं-कार्यम् ( 20 अंकाः )

**2. पत्रलेखनम्–पर्यावरणस्य रक्षणाय भवान् किं कर्तुम् इच्छति ?–अस्मिन् विषये लिखितं पत्रं मञ्जूषायां प्रदत्तैः शब्दैः पूरयत: ।** $10 \times \frac{1}{2} = 5$

................ (राँची)

22.11.20.........

माननीयाः पर्यावरणाधिकारी महोदयाः

नगरक्षेत्रम्, राँची

विषय–पर्यावरण-रक्षणाय प्रायोजितः कार्यक्रमः ।

महाशयाः !

................ निवेदनमस्ति यत् अस्माकं क्षेत्रे प्रदूषणस्य ......... ...... समस्याः वर्तन्ते । दूषितः वायुः ................ जलं च अस्माकं नियतिः जाता । अतः मया एकः ................ अत्र स्थापितः । पर्यावरणस्य रक्षणाय तत्र एकः कार्यक्रमः स्वीकृतः । कार्यक्रमस्य सफलतायै भवतां सहयोगः ................ अस्ति । ................ अस्य कार्यक्रमस्य एकः प्रमुखः अंकः वर्तते । अतः भवद्भिः तादृशः सहयोगः कर्तव्यः येन अस्मिन् क्षेत्रे छायाप्रधानाः वृक्षाः सर्वेभ्यः जनेभ्यः सुलभाः भवेयुः । ................ यत् भवतां सहयोगेन पर्यावरणस्य शुद्धिकरणे वयं नूनं ............. लप्स्यामहे । कृतज्ञतासहितम् ।

निवेदक :

(×)................

| मञ्जूषा |
|---|
| जटिलाः, युवासंघः, सफलताम्, अलकापुरी, सोमेशः, सादरं आशासे, दूषितं, अपेक्षितः, वृक्षारोपणम् । |

**3. निम्नलिखितसंवादे सङ्केतमाधृत्य रिक्तस्थानानि पूरयन्तु–** $5 \times 1 = 5$

| मञ्जूषा |
|---|
| * भोजने किं स्वीकुर्याम ?<br>* अत्रैव मम उदरे।<br>* महती वेदना वर्तते।<br>* ह्यः एकस्मिन् विवाहभोजं गत्वा बहूनि मिष्टान्नाणि खादितवान्।<br>* औषधिं प्रयच्छतु, कदापि अतिभोजनं न करिष्ये। |

वैद्यः – कथय वत्स ! किं कष्टम् अस्ति ?

रुग्णः– भो वैद्यमहोदयः। (I) ................................

वैद्यः – कुत्र वर्तते वेदना ?

रुग्णः– (आमाशयं स्पृशन्) (II) ................................

वैद्यः – ह्यः किं किं भक्षितम् आसीत् ?

रुग्णः– (III) ................................

वैद्यः – पश्यतु क्षुधानुसारम् एव भक्षणीयम् । अतिभोजनं सर्वथा रोगजनकम् एव ।

रुग्णः– (IV)................................।

वैद्यः – एताः चतस्रः गोलिकाः स्वीकरोतु । उष्णजलेन एका-एका गोलिका प्रातः सायं सेवनीया ।

रुग्णः– (V) ................................।

वैद्यः – न किमपि । केवलं दुग्धम् । उष्णजलमेव पातव्यम् । महर्षिः चरकः कथयति – जीर्णे न अश्नीयात् ।

रुग्णः– यथा आदिशसि तथा करिष्ये ।

**4. चित्रवर्णनम्–** $5 \times 2 = 10$

**प्रदत्त शब्दानां सहायतया अधोलिखितस्य चित्रस्य वर्णनं संस्कृते पंच वाक्येषु कुरुतः**



| मञ्जूषा |
|---|
| वृक्षारोपणस्य, बालकस्य, बालिकया, पादपाः, जलभाजनम्, हरितिमा, प्रसन्नः शोभनम्, रोचते । |

**केवलं प्रज्ञाचक्षुर्भ्यः ( केवल नेत्रहीन छात्रों के लिए )**

'सदाचारः' इति विषयमधिकृत्य मञ्जूषापदसहायतया पंच-वाक्यात्मकम् अनुच्छेदमेकं संस्कृते लिखत ('सदाचार' इस विषय को लेकर मञ्जूषा के पदों की सहायता से पाँच वाक्यों में संस्कृत में एक अनुच्छेद लिखें)

| मञ्जूषा |
|---|
| अनुकरणीयम्, सत्यभाषणम्, समयपालनम्, जनाः, उन्नतिम्, मानवजीवनस्य, धर्मः, चिरंजीवी, ख्यातिम्, साफल्यम् |

## खण्ड-ग : अनुप्रयुक्त–व्याकरणम् ( 30 अंकाः )

**5. अधोलिखितेषु रेखांकितपदेषु संधि संधिच्छेदं वा विधाय प्रदत्तस्थाने उत्तराणि लिखत–** $3 \times 1 = 3$

(i) <u>उभावपि</u> छात्रौ मेधाविनौ स्तः ।

(ii) अहङ्कारः विनाशाय भवति ।

(iii) विद्याऽलंकृतो अपि दुः + जनः परिहर्तव्यः ।

**6. अधोलिखितरेखांकितपदेषु समासं विग्रहं वा कृत्वा प्रदत्तस्थाने उत्तराणि लिखतः** $4 \times 1 = 4$

(i) त्रयाणां भुवनानां समाहारः अति विस्तृतम् ।

(ii) रामः <u>सहर्षम्</u> वनम् अगच्छत् ।

(iii) लवकुशौ यमलौ भ्रातरौ आस्तम् ।

(iv) शिवः <u>नीलं कण्ठं यस्य सः</u> अपि कथ्यते ।

**7. अधोलिखतम् अनुच्छेदं कोष्ठकेषु प्रदत्तानां प्रकृति–प्रत्ययान् संयोज्य पूरयत–** $5 \times 1 = 5$

प्रातःकाले उद्यानस्य शोभा खलु ............(I) ............(दृश + अनीयर्) । शीघ्रं शीघ्रं ..........(II)............(चल् + शतृ) जनाः प्रसन्नाः भवन्ति । ते वायोः ............(III)............(शीतल + तल्) अनुभवन्ति । ..... ..........(IV)............(पक्ष + इन्) मधुरस्वरेण गायन्ति । बालकाः . ....................(V)............(बालक + टाप्) च कन्दुकेन क्रीडन्ति ।

**8. तालिका पदानि संयोज्य संस्कृते पञ्च सार्थकवाक्यानि रचयत–** $5 \times 1 = 5$

| | | | |
|---|---|---|---|
| त्वम् | अधुना<br>ह्यः<br>श्वः<br>यदा-कदा<br>किञ्चित् | विद्यालयम्<br>क्रीडाक्षेत्रे<br>चित्रम्<br>पत्रम्<br>पाटलिपुत्रं | अगच्छः<br>पश्यसि<br>गमिष्यसि<br>लिखसि<br>क्रीडिष्यसि |

9. अधोलिखित वार्तालापे रिक्त स्थानानि वाच्यानुसारं पूरयित्वा प्रदत्तस्थाने उत्तराणि लिखत- $3 \times 1 = 3$

आचार्यः:- कमलेश, गत्वा पश्य किं उद्याने छात्राः क्रीडन्ति ?
कमलेशः:- आम् आचार्य। उद्याने (i)..............क्रीड्यते।
आचार्यः:- किं कोऽपि तत्र चित्रमपि रचयति ?
कमलेशः:- आम्, तत्र कैश्चित् चित्रमपि (ii) ..............।
आचार्य- शोभनम्! कि वे तत्र पुष्पाणि तु न त्रोटयन्ति ?
कमलेशः:- न, नहि श्रीमन् तैः (iii) .......... न त्रोट्यन्ते।

10. अधोलिखितेषु वाक्येषु रिक्त स्थानानि अङ्कानां स्थाने संस्कृत पदेषु समयं लिखत-( निम्नलिखित वाक्यों में रिक्त स्थानों में अंकों के स्थान पर संस्कृत पदों में समय लिखें ): $4 \times 1 = 4$
(क) छात्राः प्रातः (i) .............. 4.30 .........वादने उत्तिष्ठन्ति।
(ख) छात्राः अध्यापकाः च (ii) ........ 9.45 वादने विद्यालयं गच्छन्ति।
(ग) ............. (iii) .............. (5.15 P.M) कृषका गृहं प्रत्यागच्छन्ति।
(घ) जनाः रात्रौ (iv) .............. (10.00) स्वपन्ति।

11. अधोलिखितवाक्येषु अङ्कानां स्थाने संख्यावाचक विशेषणैः रिक्त स्थानानि पूरयत- $4 \times 1/2 = 2$
(क) अश्वस्य .............(4) पादाः भवन्ति।
(ख) संवत्सरे .............. (6) ऋतवः क्रमेण आगच्छन्ति।
(ग) कक्षायां .............. (30) छात्राः मनसा पठन्ति।
(घ) वृक्षात् ..............(3) फलानि अपतन्।

12. अधोलिखितानां वाक्यानां रेखांकितपदानां संशोध्य पुनः लिखत ( निम्नलिखित वाक्यों के रेखांकित पदों को पदों को शुद्ध करके पुनः लिखें )- $4 \times 1 = 4$
(i) राजा भिक्षुकम् अन्नं ददाति।
(ii) अयं कन्या चित्रं रचयति।
(iii) वृक्षात् पत्रं पतन्ति।
(iv) सम्प्रति वयं संस्कृतं पठन्ति।

## खण्ड-घ : पठित-अवबोधनम् ( 35 अंकाः )

13. अधोलिखितं गद्यांशं, पद्यांशं नाटयांशं च पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि निर्धारिते स्थाने लिखत-

### ( क ) गद्यांशं

ज्वालामुखपर्वतानां विस्फोटैरपि भूकम्पो जायते इति कथयन्ति भूकम्प-विशेषज्ञाः। पृथिव्याः गर्भे विद्यमानोऽग्निर्यदा खनिजमृत्तिका शिलादिसंचयं क्वथयति तदा तत्सर्वमेव लावारसताम् उपेत्य दुर्वारगत्या पर्वताग्रमुखं विदार्य बहिर्निष्क्रामति धूमभस्मावृतं जायते तदा गगनम्। सेल्सियशतापमात्रायाः अष्टशतांकतामुपगतोऽयं लावारसो यदा नदीवेगेन प्रवहति तदा पार्श्वस्थ ग्रामा नगराणि वा तदुदरे क्षणेनैव समाविशन्ति।

प्रश्न- (I) एकपदेन उत्तरत- $2 \times 1/2 = 1$
(i) केषां पर्वतानां विस्फोटैरपि भूकम्पो जायते ?
(ii) धूमभस्मावृतं किं जायते ?

(II) पूर्णवाक्येन उत्तरत- $2 \times 1 = 2$
(i) पार्श्वस्थ ग्रामाः नगराणि वा कुत्र समाविशन्ति ?
(ii) खनिजमृत्तिकादिकं कः क्वथयति ?

(III) निर्देशानुसारम उत्तरत- $4 \times 1/2 = 2$
(i) 'क्षणेनैव' इति पदस्य संधि-विच्छेदं कुरुत।?
(ii) 'पृथिव्याः' इति पदे का विभक्तिः प्रयुक्ता।
(iii) 'आकाशम्' इति पदस्य समानार्थकपदं चित्वा लिखत।
(iv) 'उपेत्य' इति पदे कः प्रत्ययः ?

### ( ख ) श्लोकः

विचित्रे खलु संसारे नास्ति किञ्चिन्निरर्थकम्।
अश्वश्चेद् धावने वीरः भारस्य वाहने खरः॥

प्रश्न- (I) एकपदेन उत्तरत- $2 \times 1/2 = 1$
(i) संसारोऽयं कीदृशः अस्ति ?
(ii) कुत्र किञ्चित् निरर्थकम् मन्यते ?

(II) पूर्णवाक्येन उत्तरत- $2 \times 1 = 2$
खरः कस्मिन् कार्ये वीरः अस्ति ?

(III) निर्देशानुसारम उत्तरत- $4 \times 1/2 = 2$
(i) 'घोटकः' इत्यर्थे कः शब्दः पद्यांशे प्रयुक्तः ?
(ii) 'विचित्रे संसारे' अनयोः पदयोः किं विशेष्यपदम् ?
(iii) 'नास्ति' इति पदस्य संधि-विच्छेद कुरुत।
(iv) 'अश्वः चेत् धावने वीरः' अत्र किम् अव्ययपदम् ?

### ( ग ) नाट्यांश

कुशः - जानाम्यहं तस्य नामधेयम्।
रामः - कथ्यताम्।
कुशः - निरनुक्रोशो नाम .......... ।
रामः - वयस्य, अपूर्वं खलु नामधेयम्।
विदुषकः - (विचिन्त्य) एवं तावत् पृच्छामि निरनुक्रोश इति कः एवं भणति ?
कुशः - अम्बा
विदुषकः - किं कुपिता एवं भणति उत प्रकृतिस्था।
कुशः - यद्यावयोर्बालभवजनितं किंचिदविनयं पश्यति तदा एवम् अधिक्षिपति इति निरनुक्रोशस्य पुत्रौ, मा चापलं कुरु।
विदुषकः - एतयोर्यदि पितुरनुक्रोश नामधेयम् एतयोर्जननी तेनावमानिता निर्वासिता एतेन वचनेन दारकौ निर्भर्त्सयति।

प्रश्न- (I) एकपदेन उत्तरत- $2 \times 1/2 = 1$
(i) का निरनुक्रोश इति सम्बोधयति ?
(ii) कः बालकयोः मातुः नाम प्रष्टुमिच्छति ?

(II) पूर्णवाक्येन उत्तरत- $2 \times 1 = 2$
किं दृष्ट्वा लवकुशयोः अम्बा अधिक्षिपति ?

(III) निर्देशानुसारम उत्तरत- $4 \times 1/2 = 2$
(i) 'जानाम्यहम्' इति पदस्य संधि-विच्छेदं कुरुत।
(ii) 'पृच्छामि' इति पदे कःमूल धातुः ?
(iii) 'विचिन्त्य' इति पदे कः प्रत्ययः प्रयुक्त ?
(iv) 'दारकौ' इति पदस्य समानार्थकशब्दं चित्वा लिखत।

14. अधोलिखितयोः कथनयोः भावम् उपयुक्तपदैः पूरयत- $3 \times 3 = 6$

(क) एक एव खगो मानी वने वसति चातकः।
पिपासितो वा म्रियते याचते वा पुरन्दरम्॥
भावः अस्ति यत् चातकः अतीव (i) .......पक्षी अस्ति। सः सदैव (ii).......... वसति। सः पिपासितः म्रियते वा (iii)........... एव याचते।

(ख) प्राणेभ्योऽपि प्रियः सुहृद्।
अस्य अभिप्रायः अस्ति यत्- (i)............कृते (ii) ............. प्राणेभ्यः अपि। (iii) .............भवति।

15. अधोलिखितश्लोकद्वयस्य अन्वयौ पूरयित्वा उत्तराणि लिखत- $1\frac{1}{2} \times 1\frac{1}{2} = 3$

(क) श्रमक्लमपिपासोष्ण शीतादीनां सहिष्णुता।
आरोग्यं चापि परमं व्यायामादुपजायते॥

अन्वयः
श्रम-क्लम (i)............उष्ण शीतादीनां (ii).............आरोग्यं च अपि (iii).............उपजायते।

(ख) एकेन राजहंसेन या शोभा सरसो भवेत्।
न सा बकसहस्त्रेण परितस्तीरवासिना॥

अन्वयः- सरसः या (i)............एकेन राजहंसेन भवेत् सा (ii)..... .........तीरवासिना (iii)............न।

16. रेखांकित पदानि आधृत्य प्रश्ननिर्माणं कुरुत- $4 \times 1 = 4$
(क) एतादृशी भयावहघटना गढ़वालक्षेत्रे घटिता।
(ख) मालाकारः तोयैः तरोः पुष्टिः करोति।
(ग) भृंगाः रसालमुकुलानि समाश्रयन्ते।
(घ) अम्भोदाः वृष्टिभिः वसुधां आर्द्रयन्ति।

17. अधोलिखितानि वाक्यानि घटनाक्रमेण संयोजयत- $8 \times 1/2 = 4$
(क) पेयोपहारपूर्वं भोजनं घृतसहितौदनं व्यञ्जनं च तस्मै प्रदत्तवती।
(ख) एकदा स कावेरीतीरपत्तने विगलितसमृद्धिं विरलभूषणां कुमारीमपश्यत्।
(ग) एवं कन्यागुणसम्पदा समाकृष्टः शक्तिकुमारस्तां विधिवदुपयम्य नीतवान्।
(घ) अस्ति द्रविडेषु काञ्ची नाम नगरी।
(ङ) भुक्ते तु तस्मिन् तया अस्य शयन व्यवस्थापि कृता।
(च) तस्यामनेककोटिसारः श्रेष्ठिपुत्रः शक्तिकुमारो नामासीत्।
(छ) अथ सा कन्या धात्रीमुखेनातिथिं स्नानाय प्रेरितवती।
(ज) अस्ति ते कौशलं शालिप्रस्थेनानेन सम्पन्नाहारम् अस्मान् भोजयितुम्।

18. अधोलिखितानां शब्दानां विलोमपदैः सह मेलनं कुरुत- $6 \times 1/2 = 3$

| शब्दाः | विलोमपदानि |
|---|---|
| (i) निर्गतः | तदानीम् |
| (ii) शीतम् | सम्पन्नम् |
| (iii) आलस्यम् | प्रविष्टः |
| (iv) विपन्नम् | विनाश्य |
| (v) सम्प्रति | उष्णम् |
| (vi) निर्माय | उद्यमः। |

## उत्तर

### खण्ड-क : अपठितम्-अवबोधनम् ( 15 अंकाः )

1. (अ) (i) (क) पथिकः (ख) फलानि
(ii) (क) यत् वृक्षाः एवं सर्वस्वेन जीवान् उपकुर्वन्ति।
(ख) मधुराणि आम्रणि वृक्षात् अपतन्।
(iii) (क) सः (पथिकः) (ख) लङ् (ग) गम् + शतृ (घ) वृक्षेभ्यः।
(आ) (i)(क) विद्याध्ययनम् (ख) विशुद्धा
(ii) (क) कौत्सस्य वचनं श्रुत्वा गुरूणा कथितम्–"तव विशुद्धया शृध्या उत्कृष्टया भावनया परमया सेवया च नितान्तमस्मि प्रीतः। तस्मात् नाहं कामये अन्यां काञ्चित दक्षिणाम्।
(ख) गुरोः वचनं श्रुत्वां कौत्सस्य मनसि महती चिन्ता जाता, एतावत्यः मुद्राः कुतः आनेतव्याः ?
(iii) (क) गुरुणा (ख) सकाशम् (ग) न + अहम् (घ) आ + ग्रहम्
(iv) गुरुदक्षिणा

### खण्ड-ख : रचनात्मकं-कार्यम् ( 20 अंकाः )

2. (क) अलकापुरी (ख) सादरं (ग) जटिलाः (घ) दूषितं (ङ) युवासंघः (च) अपेक्षितः (छ) वृक्षारोपणम् (ज) आशासे (झ) सफलताम् (ञ) सोमेशः।
3. (i) महती वेदना वर्तते (ii) अत्रैव मम उदरे
(iii) हयः एकस्मिन् विवाहभोजनं गत्वा बहूनि मिष्टानानि खादितवान्
(iv) औषधि प्रयच्छतु कदापि अतिभोजनं न करिष्ये।
(v) भोजने किं स्वीकुर्याम।
4. (क) 1. एतत् चित्रां वृक्षारोपपस्य अस्ति।
2. बालकस्य हस्ते पादम् अस्ति।
3. सः प्रसन्नः अस्ति।
4. अत्र एकं जलभाजनम् अस्ति।
5. पादपानाम् हरितिमा रोचते।

**अथवा,**

1. सत् + आचारः इति सदाचारं भवति।
2. सत्यभाषणम् समयपालनम् च सदाचार अस्ति।
3. सदाचारः मानवजीवनस्य धर्मः अस्ति।
4. जनाः सदाचारेण एवं उन्नतिम् ख्यातिम् साफल्यम् च प्राप्नुवन्ति।
5. अस्माभिः सदाचारम् अनुकरणीयम्।

### खण्ड-ग : अनुप्रयुक्त-व्याकरणम् ( 30 अंकाः )

5. (क) उभौ + अपि (ख) अहम् + कारः (ग) दुर्जनः
6. (क) त्रिभुवनम् (ख) हर्षेण सहितम्
(ग) लवः च कुशः च (घ) नीलकण्ठः
7. (i) दर्शनीया (ii) चलन्तः (iii) शीतला (iv) पक्षिणः (v) बालिकाः
8. त्वम् अधुना पत्रं लिखसि।
त्वम् ह्यः विद्यालयम् अगच्छः।
त्वम् श्वः पाटलिपुत्रं गमिष्यसि।
त्वम् यदा कदा क्रीडा क्षेत्रे क्रीडिष्यसि
त्वम् किञ्चित् चित्रम् पश्यसि।
9. (i) छात्रैः (ii) रच्यते (iii) पुष्पाणि
10. (क) सार्धचतुर्वादने (ख) पादोनदश (ग) सपादपञ्च (घ) दशवादने
11. (क) चत्वारः (ख) षट् (ग) त्रिंशत् (घ) त्रीणि
12. (क) राजा भिक्षुकाय अन्नं ददाति।
(ख) इयं कन्या चित्रं रचयति।
(ग) वृक्षात् पत्राणि पतन्ति।
(घ) सम्प्रति ते संस्कृतं पठन्ति।

### खण्ड-घ : पठितम्-अवबोधनम् ( 35 अंकाः )

13. (क) गद्यांशं
(I) (i) ज्वालामुखपर्वतानां (ii) गगनं
(II) (i) पार्श्वस्थ ग्रामाः नगराणि वा तदुदरे क्षणेनैव समाविशन्ति।
(ii) खनिजमृत्तिकादिकं शिलादिसंचयं क्वथयति।
(III) (i) क्षणेन + एव (ii) षष्ठी
(iii) गगनं (iv) ल्यप्

(ख) पद्यांश
(I) (i) विचित्रः (ii) संसारे
(II) (i) खरः भारवहने वीरः अस्ति।
(III) (i) अश्वः (ii) संसारे (iii) न + अस्ति (iv) चेत्

(ग) नाट्यांश
(I) (i) अम्बा (ii) रामः
(II) (i) यदा बालभावजनितं किञ्चित् विनयं पश्यति तदा लवकुशयोः अम्बा अधिक्षिपति।
(III) (i) जानामि + अहम् (ii) पृच्छ (iii) ल्यप् (iv) पुत्रौ।
14. (क) (i) मानी (ii) अरण्ये (iii) वर्षाजरणम्
(ख) (i) मित्रं (ii) सुख (iii) प्रियः
15. (क) (i) पिपासा (ii) सहिष्णुता, परमं (iii) व्यायामात्
(ख) (i) शोभा (ii) परितः (iii) बकसहस्रेण
16. (क) कीदृशी भयावहघटना गढ़वालक्षेत्रे घटिता ?
(ख) मालाकारः तोयैः कस्य पुष्टिः करोति ?
(ग) भृंगाः कानि समाश्रयन्ते ?
(घ) अम्भोदाः वृष्टिभिः काम् आर्द्रयन्ति ?
17. (क) अस्ति द्रविणेषु काञ्ची नाम नगरी।
(ख) तस्यामनेककोटिसारः श्रेष्ठिपुत्रः शक्तिकुमारो नामासीत्।
(ग) एकदा स कावेरीतीरपत्तने विगलितसमृद्धिं विरलभूषणां कुमारीमपश्यत्।
(घ) अस्ति ते कौशलं शालिप्रस्थेनानेन सम्पन्नाहारम् अस्मान् भोजयितुम्।
(ङ) अथ सा कन्या धात्रीमुखेनातिथिं स्नानाय प्रेरितवती।
(च) पेयोपहारपूर्वं भोजनं घृतसहितौदनं व्यञ्जनं च तस्मै प्रदत्तवती।
(छ) भुक्ते तु तस्मिन् तया अस्य शयन व्यवस्थापि कृता।
(ज) एवं कन्यागुणसम्पदा समाकृष्टः शक्तिकुमारस्तां विधिवदुपयम्य नीतवान्।
18. (i) प्रविष्टः (ii) उष्णम् (iii) उद्यमः
(iv) सम्पन्नम् (v) तदानीम् (vii) विनाश्य